# पाठ-२२
# कष्टं न्यासस्य रक्षणम्

**सारान्शः**
चारुदत्तः तस्य मित्रं विदूषकः च संगीतगोष्ठया: रात्रौ अतिचिरात् गृहम् आगच्छन्ति । वर्द्धमानकः विदूषकं कथयति-एतत् तव सुवर्णभाण्डम् । एतानि स्वर्ण आभूषणानि वसन्तसेनाया रक्षार्थम् आर्यचारुदत्ताय दत्तानि । एतेषां रक्षाम् अहं दिने करोमि। रात्रौ तु भवान्। अतः गृह्यताम् इदम्।रात्रौ शर्विलकः नाम चौरः चारुदत्तस्य गृहे सन्धिं कल्पयित्वा प्रविशति । तत्र स बहुमूल्यानि वस्तूनि द्रव्यं वा अन्वषयति किन्तु केवलं मृदङ्गवीणादीनि वाद्ययन्त्राणि पुस्तकानि च पश्यति। एतद् दृष्ट्वा सः असन्तुष्टः भवति । सः तु अत्र बहुमूल्यं किञ्चित् नेतव्यम् भवेत् इति चिन्तयित्वा आगतः किन्तु इदं गृहं तु कस्यापि अतिदरिद्रस्य दृश्यते । स प्रत्यावर्तुम् इच्छति। तदैव विदूषकः स्वप्ने कथयति- गृहाण एतत् सुवर्णभाण्डम् । प्रथमं स सुप्तजनान् सुवर्णभाण्डं गृहीतुम् अयुक्तं मन्यते किन्तु यदा विदूषकः 'शापितोऽसि यदि न गृह्णाति इति कथयति तदा शर्विलकः शापभयेन सुवर्णभाण्डं गृह्णाति । विदूषकः अवगच्छति यत् तेन स्वर्णाभूषणस्य पेटिका चारुदत्ताय समर्पिता । एवं मत्वा सः निश्चिन्तः स्वपिति।

**मुख्य बिन्दवः**
मृच्छकटिकम्- संस्कृतसाहित्यनाट्यजगति मृच्छकटिकम् नाटकम् अन्यतमं वर्तते। इदं नाटकम् एकं प्रकरणं वर्तते । प्रकरणस्य वृत्तम् लौकिकम् कविकल्पितं च भवति। अस्य नायकः चारुदत्तः धीरप्रशान्तलक्षणयुक्तः मध्यमकुलस्य सामान्यः जनः वर्तते । उदारतया दानशीलतया च सः निर्धनः जायते । नाटके चौरसेवकशाकटिकचाण्डालादीनि सामान्यपात्राणि सन्ति । नायिका वसन्तसेना अपि एका गणिका अस्ति । नाटककारः अस्मिन् नाटके सामान्यजीवनस्य यथार्थचित्रणं कृतवान् ।

**अवगच्छामः**
'मृच्छकटिकम्' नाम नाटकं विशेषम् 'अस्ति । अत्र साधारणस्य जनजीवनस्य भावाः, क्रियाः एवं चित्रिताः यत् ते अद्यापि अस्माकं जीवनस्य, वर्तमानस्य समाजस्य चित्राणि इव प्रतीयन्ते । शूद्रकः अस्य नाटकस्य लेखकः । नाटके चारुदत्तः नाम नायकः । तस्य मित्रं मैत्रेयः नाम विदूषकः । चारुदत्तः पूर्वं धनिकः आसीत् परं भाग्यवशात् दरिद्रः जातः । धूता नाम तस्य पतिपरायणा पत्नी । एकदा वसन्तसेना स्व आभूषणानि चारुदत्ताय न्यासरूपेण रक्षार्थं समर्पितवती । शर्विलकः नाम कोऽपि चौरः चारुदत्तस्य गृहे प्रविष्टवान् तानि आभूषणानि च नीतवान्।

**आवश्यकोऽयं ज्ञानम्**
शूद्रकः मृच्छकटिकनाटकस्य रचयिता शूद्रकः एकः राजा आसीत्। सः धर्मशास्त्रे, द्यूतकलायां, चौर्यकलायां, लोकविद्यायां च निष्णातः आसीत्। शूद्रकस्य स्थितिकालः तृतीयशताब्दी मन्यते । अयं नाटककारः भारतस्य दक्षिणतः प्रतीयते ।

**व्याकरण बिन्दवः शब्द भण्डाराश्च**
**दीर्घसन्धिः**
- **सूत्रम्-** अकः सवर्णे दीर्घः
- **अर्थः-** अकः सवर्णाचि परे पूर्वपरयोः स्थाने दीर्घ एकादेशः भवति।

**उपपद विभक्ति**
- स्वस्ति, अलम् (पर्याप्त्यर्थे) पदयोः योगे **चतुर्थी** विभक्तिः भवति।
- अलम् (निषेधार्थे) **तृतीया** विभक्तिः भवति ।
- कृते योगे तु **षष्ठी** विभक्तिः भवति।

**शब्दार्थाः**
1. वीथ्यां = गली में
2. शब्दापय = बुलाओ
3. निद्राचौरः = नींद चुराने वाला
4. इष्टिकाः = ईंटें
5. वंशाः = बाँसुरियाँ
6. पीडयितुम् = सताना
7. द्यूते = जुआ में
8. सकाशं = समीप

**योग्यतां वर्धयत**
**(क)** आपणान्तररथ्या विभागेषु सुखं कुक्कुराः अपि सुप्ताः । अर्धरात्रेः परम् एतत् दृश्यम् कुक्कुराः अपि सुखेन सुप्ताः । निःशब्दा रात्रिः ।
**(ख)** अलं सुप्तजनं प्रबोधयितुम् ।
**(ग)** न जाने कपटशयितं परमार्थसुप्तम् वा।
**(घ)** इदानीं विक्रीतपण्य इव वणिजः सुखं स्वप्स्यामि । (निश्चिन्तः)
**(ङ)** किम् अहं परिहासस्यापि देशकालं न जानामि ।
**(च)** सत्यञ्च न परिभ्रष्टं यद्दरिद्रेषु दुर्लभम् ।
**(छ)** पतिव्रताः नार्यः दुर्लभाः लोके ।
**(ज)** भर्तुर्भोग्यं तु नार्येका प्राप्नोति पुरुषर्षभ ।

**(झ)** दातव्यमन्नं विधिवत् सत्कृत्य न तु लीलया। (बालकाण्डम् 93/94)
**(ञ)** कालो हि दुरतिक्रमः । (अरण्यकाण्डम् 68 / 29)

**पाठ संप्रेष्यः**

- चारुदत्तः सत्यप्रियः सच्चरित्रः धनलोभात् विरक्तः अस्ति ।
- विदूषकः चारुदत्तस्य हास्यप्रियः सखा अस्ति । तस्य नाम मैत्रेयः अस्ति ।
- चारुदत्तस्य पत्नी आर्यधूता अस्ति । सा पतिव्रता सम्माननीया गृहिणी अस्ति।
- आर्यधूता पत्युः यशः रक्षार्थं स्वप्रियम् आभूषणं वसन्तसेनायै प्रयच्छति।
- नाट्यांशस्य सारम् अतीव मनोरञ्जकम् अस्ति ।
- लोट्लकारक्रियापदानां लङ्लकारे परिवर्तनं कर्तुं शक्यते ।
- स्वस्ति, अलम् (पर्याप्त्यर्थे) पदयोः योगे चतुर्थी, अलम् (निषेधार्थी) तृतीया भवति। 'कृते' योगे तु षष्ठी।
- पणवः, मृदङ्गः, वीणा वाद्ययन्त्राणि सन्ति।

**अधिकाङ्कानाम् अर्जनं कथं भवेत् ।**

- पाठस्य सम्यक् रूपेण अध्ययनं कृत्वा भावम् अवगच्छेत।
- पाठे आगतानां कठिन शब्दानां व्याकरणात्मक स्वरूपं जानीयात् ।
- अधिकाधिक अध्याये संदर्भित विषयाणां अध्ययनं कर्तव्यम्।

**स्व मूल्याङ्कनम् कुरुत**

- अध्यायस्य भावं स्व शब्दैः वर्णयत ।
- अध्याये आगतानां व्याकरण बिन्दुनां अभ्यासं कुरुत ।
- मूल पाठस्य अभ्यासं कुरुत।